# Naradaproktam Shivarchanamahimavarnanam

# નારદપ્રોક્તં શિવાર્ચનમહિમવર્ણનમ્

## Document Information

Text title : Naradaproktam Shivarchanamahimavarnanam

File name : shivArchanamahimavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 5 | 10-99 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# નારદપ્રોક્તં શિવાર્ચનમહિમવર્ણનમ્

સાધુ સાધુ મહાપ્રાજ્ઞ ચિરઞ્જીવ શિવં વ્રજ ।
ભજ મૃત્યુઞ્જયં ભક્ત્યા જય મૃત્યું શિવાર્ચનૈઃ ॥ ૧૦॥

ધન્યોઽસિ કૃતકૃત્યોઽસિ કૃતકૃત્યતમઃ શ્રિયા ।
આદૃતોઽસિ મહાશૈવ ભૂતિરુદ્રાક્ષવત્તયા ॥ ૧૧॥

જાતમાત્રસ્ય યા બુદ્ધિઃ મહાદેવાર્ચને તવ ।
સા તાવન્નાદ્ભુતા સાયં દૃષ્ટં લિઙ્ગં ત્વયા યતઃ ॥ ૧૨॥

તલ્લિઙ્ગદર્શનોત્પન્નપુણ્યેનૈવ શિવાર્ચનમ્ ।
અધુના ભક્તિરુત્પન્ના સદ્યઃ સ્વર્ગાપવર્ગદા ॥ ૧૩॥

અદ્યપ્રભૃતિ ન ત્યાજ્યં શિવલિઙ્ગાર્ચનં ત્વયા ।
ન ત્યાજ્યં સહસા બાલ ભસ્મરુદ્રાક્ષભૂષણમ્ ॥ ૧૪॥

શિવાર્ચનેન કાલોઽયં નેયઃ કલ્યાણદો યતઃ ।
વ્યર્થકાલાપનયનં ન કાર્યં જ્ઞાનિના ત્વયા ॥ ૧૫॥

આયુઃ શિવાર્ચનેનૈવ યદિ ક્ષીણં ભવિષ્યતિ ।
તદા જ્ઞાનં ચ સફલં તદાઽઽયુરપિ સાર્થકમ્ ॥ ૧૬॥

જ્ઞાનેનાજ્ઞાનમાત્રસ્ય વિનાશે સતિ સર્વથા ।
શિવાર્ચનાર્થં યત્નસ્તુ કર્તવ્યસ્તેન મુચ્યતે ॥ ૧૭॥

યાવદ્ભૂમૌ ભવેજ્જીવઃ તાવદ્ભ્રમતિ સર્વથા ।
સંસારઘોરનરકે પાપનક્રગ્રહાકુલે ॥ ૧૮॥

જ્ઞાનમાત્રં ચ યત્તુલ્યં તુચ્છજન્તુસમાશ્રિતમ્ ।
તાદૃશં જ્ઞાનમન્યેષાં ન મુક્ત્યર્થં પ્રજાયતે ॥ ૧૯॥

પતઙ્ગાનાં ન કિં જ્ઞાનં તત્ કિં મોક્ષસ્ય સાધનમ્ ।
મોક્ષસાધનભૂતં તુ જ્ઞાનમન્યદ્વિલક્ષણમ્ ॥ ૨૦॥

યેન જ્ઞાનેન મુક્તિઃ સ્યાત્ તજ્જ્ઞાનાભ્યસનાત્ પરમ્ ।
મુક્તો ભવતિ તજ્જ્ઞાનં કેવલં શિવપૂજયા ॥ ૨૧॥

દેવોત્તમોત્તમત્વેન જ્ઞાતે સતિ મહેશ્વરે ।
તજ્જ્ઞાનાદેવ મુક્તિઃ સ્યાત્ તજ્જ્ઞાનં ચ શિવાર્ચનમ્ ॥ ૨૨॥

ધર્માધર્મતયા જ્ઞાનં શ્રીમહાદેવપૂજનમ્ ।
તેન મુક્તિર્ભવત્યેવ સ્વર્ગભોગાશ્ચ સર્વથા ॥ ૨૩॥

ભક્ત્યા શઙ્કરમભ્યર્ચ્ય યઃ સ્વર્ગં નાભિવાઞ્છતિ ।
તસ્યાપિ ભવતિ સ્વર્ગોઽપ્યપવર્ગો ન સંશયઃ ॥ ૨૪॥

સ્વર્ગાર્થમપિ ચેદ્ભક્ત્યા શઙ્કરારાધકસ્તદા ।
અપવર્ગો ભવત્યેવ સ્વર્ગોઽપ્યત્ર ન સંશયઃ ॥ ૨૫॥

સ્વર્ગાપવર્ગદં યસ્માત્ લિઙ્ગે શઙ્કરપૂજનમ્ ।
તત્ તત્ ફલમદત્વા તુ ન તિષ્ઠત્યેવ સર્વથા ॥ ૨૬॥

શિવલિઙ્ગાર્ચનાકારો યઃ કલ્પતરુરુત્તમઃ ।
સ સર્વકલદો નિત્યં ભવત્યેવ ન સંશયઃ ॥ ૨૭॥

રૂપલાવણ્યસમ્પન્નાઃ તરુણીગણકોટયઃ ।
આસન્ના એવ તસ્ય સ્યુઃ યઃ શિવારાધનપ્રિયઃ ॥ ૨૮॥

દિવ્યતુઙ્ગતુરઙ્ગાણાં કોટયઃ સમુપસ્થિતાઃ ।
ભવન્ત્યેવ ન સન્દેહઃ શિવલિઙ્ગાર્ચકાઙ્ગણે ॥ ૨૯॥

ઉપસ્થિતાઃ સર્વદાપિ મત્તમાતઙ્ગકોટયઃ ।
યઃ શિવારાધનોદ્યુક્તઃ તદ્ગૃહદ્વારમણ્ટપે ॥ ૩૦॥

સુરાસ્તદ્વશમાયાન્તિ યઃ શિવારાધનોત્સુકઃ ।
તિષ્ઠન્તિ દેવાઃ સતતં શિવારાધકમન્દિરે ॥ ૩૧॥

શિવજ્ઞાનં સમાસાદ્ય યઃ શિવાર્ચનતત્પરઃ ।
તદ્દર્શનેન મુક્તિઃ સ્યાત્ સ યસ્માચ્છઙ્કરપ્રિયઃ ॥ ૩૨॥

શામ્ભવૈઃ સહ સંલાપોઽપ્યઘકોટિવિનાશકઃ ।
શામ્ભવાનાં દર્શનં ચ શઙ્કરસ્યૈવ દર્શનમ્ ॥ ૩૩॥

શાઙ્કરો દુર્લભો લોકે શિવપૂજાઽપિ દુર્લભા ।
દુરાત્મનાં તથા બુદ્ધિઃ કુતઃ સ્યાદ્ શિવપૂજને ॥ ૩૪॥

કિં વાઽન્યદુચ્યતે બાલ શાઙ્કરેણાઽપિ ભોજનમ્ ।
કૃતં હિ શિવવિદ્યાયાં તતઃ સાઽતીવ દુર્લભા ॥ ૩૫॥

શિવવિદ્યા મહાવિદ્યા વિદ્યાનાં પરમા મતા ।
તસ્યાઃ સઙ્ગોપનં તેન કૃતમિત્યત્ર નાદ્ભુતમ્ ॥ ૩૬॥

સા તુ વિદ્યા પ્રયત્નેન પાર્વત્યા સ્કન્દસન્નિધૌ ।
પ્રાપ્તા શિવપ્રસાદેન સ્કન્દેનાપિ મહેશ્વરાત્ ॥ ૩૭॥

આરાધિતઃ શઙ્કરોઽપિ સ્કન્દેન શિવયાઽપિ ચ ।
તાભ્યામુક્તા મહાવિદ્યા ભુક્તિમુક્તિપ્રદાયિની ॥ ૩૮॥

અનન્તયત્નલબ્ધા સા મહાવિદ્યા મહાત્મના ।
મહાદેવેન દત્તેતિ મહાગૌર્યા મુહુર્મુહુઃ ॥ ૩૯॥

સા યા તુ મૂલવિદ્યાઽસ્તિ શિવવિદ્યા શિવાત્મિકા ।
સા દુર્લભા ન કસ્યાપિ સા સ્ફુરત્યપિ સર્વથા ॥ ૪૦॥

તદ્વિદ્યાસાધનીભૂતં શઙ્કરારાધનં પરમ્ ।
અશાઙ્કરારાધકસ્ય દુર્લભં ખલુ દૃશ્યતે ॥ ૪૧॥

યદ્દુર્લભમિતિ જ્ઞાનં તદેવ સુલભં ભવેત્ ।
શિવાર્ચનેન તત્તસ્માત્ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૪૨॥

શિવાર્ચનેન લોકેષુ કો વા મુક્તો ન જાયતે ।
તત્ર તાવન્ન વિશ્વાસો ભવિષ્યતિ દુરાત્મનામ્ ॥ ૪૩॥

મહેશાર્ચનમાહાત્મ્યં ન વિજાનન્તિ માનવાઃ ।
અત એવ પતન્ત્યેતે નરકેષુ ન સંશયઃ ॥ ૪૪॥

શિવાર્ચનપરિત્યાગઃ સર્વથા પાપસાધનમ્ ।
તેન પાપેન યાત્યેવ નરકં દુષ્કરં પરમ્ ॥ ૪૫॥

અયત્નેન પ્રયત્નેન નરકં પ્રતિ માનવાઃ ।
અહો ન નીરમપ્યલ્પં ન ચ યચ્છતિ પલ્લવમ્ ॥ ૪૬॥

પુષ્પં વા દેવદેવાય લિઙ્ગરૂપાય સર્વદા ।
સુલભાન્યેવ પત્રાણિ જલાનિ વિમલાન્યપિ ॥ ૪૭॥

સર્વભાવેન યો ભાવો ભાવપૂજનતત્પરઃ ।

ભવે ભવેઽપિ ન ભવેત્ સ ભૂયો (ભૂતો)ન ભવિષ્યતિ ॥ ૪૮॥

કઃ શઙ્કરજ્ઞાનરસં વિહાયાઽપિ રસાન્તરમ્ ।
સ તાવદજ્ઞો વિજ્ઞેયઃ સંજ્ઞાયા વિધયાઽપિ વા ॥ ૪૯॥

અવજ્ઞાયાઃ પરં સ્થાનં શઙ્કરાનર્ચકો જનઃ ।
તુષ્યત્યેવ મહાદેવઃ કેવલં તદનુજ્ઞાયા ॥ ૫૦॥

અવજ્ઞાપાત્રભૂતસ્યાપ્યવજ્ઞાં યસ્તુ મોહતઃ ।
ન કરિષ્યતિ તં તાવત્ પાતયત્યેવ પાતકે ॥ ૫૧॥

કૃત્વા પાપાન્યનન્તાનિ સકૃદ્વા યઃ શિવં સ્મરેત્ ।
સ ધૂતપાપ ઇત્યેવ વિજ્ઞેયો મુનિસત્તમૈઃ ॥ ૫૨॥

મુનીનામપિ વન્દ્યઃ સ્યાન્મહાદેવપરાયણઃ ।
વન્દ્યો નારાયણાદીનાં સુરાણામપિ સર્વથા ॥ ૫૩॥

શિવાર્ચનપરો લોકે વન્દ્યઃ પૂજ્યશ્ચ સર્વથા ।
તત્પૂજયા પરં સર્વે મુક્તા ઇત્યવધારણા ॥ ૫૪॥

મહાદેવોઽપિ તં દૃષ્ટ્વા તુષ્ટો ભવતિ માનવમ્ ।
યો ભક્ત્યા લિઙ્ગપૂજાયાં નિરતઃ સર્વસાધનૈઃ ॥ ૫૫॥

સકૃદ્વા પ્રણમેદ્યસ્તુ શઙ્કરં ભક્તિપૂર્વકમ્ ।
તસ્ય પાપાનિ નશ્યન્તિ સ એવ પુરુષર્ષભઃ ॥ ૫૬॥

ધન્યં કૃતાર્થં તં મન્યે કૃતકૃત્યોત્તમોત્તમમ્ ।
યઃ ક્ષણં વા મહાદેવં લિઙ્ગે પૂજયતિ પ્રભુમ્ ॥ ૫૭॥

ભસ્મોદ્ધૂલિતસર્વાઙ્ગો રુદ્રાક્ષાભરણાન્વિતઃ ।
યો નાર્ચયતિ ગૌરીશં સ પાતકગણાશ્રયઃ ॥ ૫૮॥

શિવાર્ચનાગ્નિસન્દગ્ધાઃ પાપપર્વતકોટયઃ ।
તસ્યાશક્યં ન લોકેઽસ્મિન્ સર્વથા નૃપબાલક ॥ ૫૯॥

ભાગ્યબુદ્ધિઃ પ્રવૃદ્ધા સ્યાત્ શ્રીમહાદેવપૂજયા ।
દુર્લભં દુર્લભં યસ્માત્ શ્રીમહાદેવપૂજનમ્ ॥ ૬૦॥

પ્રાતઃ કાલે મહાદેવં ભસ્મરુદ્રાક્ષભૂષણમ્ ।
અભ્યર્ચ્ય લિઙ્ગરૂપં ત્વં મુચ્યસે નાત્ર સંશયઃ ॥ ૬૧॥

કાલત્રયેઽપિ કર્તવ્યં શિવલિઙ્ગાર્ચનં બુધૈઃ ।
મધ્યે મધ્યેઽપિ કર્તવ્યં વિરતિસ્તસ્ય નોચિતા ॥ ૬૨॥

યસ્ય સ્યાદ્વિરતિર્દૈવાત્ શ્રીમહાદેવપૂજને ।
સ ન સંસારપાપેભ્યો મુચ્યતે નાત્ર સંશયઃ ॥ ૬૩॥

પાપાર્ણવસમાકીર્ણો ન લિઙ્ગાર્ચનતત્પરઃ ।
લિઙ્ગાર્ચનપરિત્યાગાત્ પુનશ્ચાદ્યં (પુનઃ સાપિ)ભવિષ્યતિ ॥ ૬૪॥

શિવલિઙ્ગાર્ચનં મન્યે મહાપાતકનાશનમ્ ।
તન્ન જાનન્તિ સહસા નરા વાનરવૃત્તયઃ ॥ ૬૫॥

યેષાં નરાણાં પુણ્યાનિ બહૂનિ વિવિધાન્યપિ ।
તેષામેવ ભવેદ્ધર્મઃ શિવલિઙ્ગસમર્ચને ॥ ૬૬॥

શિવાર્ચને ન યસ્યાસ્તિ વિશ્વાસો મુક્તિદાયકઃ ।
સ એવ સાધ ઇત્યેવ જ્ઞાતવ્યો મુનિભિર્નૃપ ॥ ૬૭॥

શિવાર્ચનં વિના ભૂપ ન પેયં જલમાદરાત્ ।
ન ભોક્તવ્યં ચ સહસા તામ્બૂલસ્ય ચ ચર્વણમ્ ॥ ૬૮॥

યદેવ સ્વોપભોગાર્થં પવિત્રં વસ્તુ તન્મુદા ।
નિવેદ્ય શમ્ભવે પશ્ચાત્ સ્વભોગાય પ્રકલ્પયેત્ ॥ ૬૯॥

- -

મૃત્યુર્બિભેતિ ભીતાસ્તે કાલસ્યાપિ ભટાઃ સદા ।
મૃત્યુઞ્જયાર્ચનં દૃષ્ટ્વા જલૈરપિ ફલૈરપિ ॥ ૯૧॥

કલ્યાણાન્યનુધાવન્તિ કલ્યાણપતિપૂજયા ।
સર્વકલ્યાણનાથોઽયં મઙ્ગલાપતિપૂજયા ॥ ૯૨॥

સ સર્વમઙ્ગલાકાન્તઃ સર્વમઙ્ગલસંશ્રયઃ ।
સર્વમઙ્ગલદાતા ચ શિવભક્તાય કેવલમ્ ॥ ૯૩॥

આલસ્યેનાપિ યઃ કુર્યાન્મહાદેવસ્ય પૂજનમ્ ।
સ તરત્યેવ સંસારમહાપદ્ઘોરસાગરાત્ ॥ ૯૪॥

સુલભં ચ મહેશસ્ય પૂજનં શામ્ભવસ્ય તુ ।
અશામ્ભવાનાં કઠિનં તત્ર નાધિકૃતોઽપિ સઃ ॥ ૯૫॥

શૈવત્વમઙ્ગં શિવપૂજનેષુ મુખ્યં ન તેનાપિ વિના શિવાર્ચા ।

અન્યચ્ચ તત્સાધનમસ્તુ તત્તુ મુખ્યં તદેવેત્યવધારિતં હિ ॥ ૯૬॥

તેનાધિકારે સતિ સર્વદાપિ શિવાર્ચનં તેન કૃતં પ્રયત્નાત્ ।
સર્વાર્થસિદ્ધ્યૈ ભવતીતિ મન્યે સ એવ ધન્યો ભુવનત્રયેઽપિ ॥ ૯૭॥

શૈવેન દત્તં ફલમમ્બુ પત્રં શુષ્કં નવં વા ત્રુટિતં ક્ષતં વા ।
ગૃહ્ણાતિ શમ્ભુઃ શિરસા દદાતિ તસ્મૈ ફલાન્યપ્યમિતાનિ નિત્યમ્ ॥ ૯૮॥

યો વિશ્વસ્ય મહેશ્વરં ત્રિનયનં લિઙ્ગે સમભ્યર્ચયેત્
ભક્ત્યા ભૂતિવિભૂષિતોઽતિમુદિતો રુદ્રાક્ષભૂષાશ્રયઃ ।
તત્પાદામ્બુજરેણુભિર્જગદિદં પૂતં સુરાઃ પાવનાઃ
સર્વે વિષ્ણુચતુર્મુખપ્રભૃતયઃ તસ્માત્ સ ધન્યઃ સદા ॥ ૯૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે નારદપ્રોક્તં શિવાર્ચનમહિમવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૫ -
રાજકુમારનારદસંવાદે શિવપૂજામહિમવર્ણનમ્ । ૧૦-૯૯॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 5 -
rAjakumAranAradasaMvAde shivapUjAmahimavarNanam . 10-99..

Proofread by Ruma Dewan

*Naradaproktam Shivarchanamahimavarnanam*
pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*